## केन्द्रीयसंस्कृतविश्वविद्यालयः

नवश्रृङ्खला ०७-०८

श्रीरामप्राणप्रतिष्ठासंवत् १

# संस्कृतवार्ता

षाण्मासिक वार्तापत्रिका

वर्षम्-१४ वैक्रमाब्दः २०८१ पौषकृष्णपञ्चमी-ज्येष्ठकृष्णनवमी जनवरी-जून २०२४








**संरक्षकः**
प्रो. श्रीनिवासवरखेडी
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः,नवदेहली


**सम्पादकौ**
डॉ.अजयकुमारमिश्रः
डॉ.पवनव्यासः

**सम्पादनसहयोगः**
विनयकुमारशुक्लः


**प्रकाशकः**
**कुलसचिवः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)



५६-५७, इन्स्टीट्यूशनल एरिया जनकपुरी,
नवदेहली-११००५८
011-28524993,28521994,28520977
Email : sanskritvarta@csu.co.in
Website
www.sanskrit.nic.in/publication_and_programme.php

https://www.facebook.com/centralsanskri
https://www.youtube.com/c/CentralSanskritUniversityDelhi
https://twitter.com/centralsanskrit



ENRICH YOUR READING LIST WITH




CENTRAL SANSKRIT UNIVERSITY

LATEST PUBLICATION



# गणतन्त्रमहोत्सवे कुलपतिमहोदयस्य

## सन्देशः

भारताय समर्पितचित्तेभ्यः सर्वेभ्यः पञ्चसप्ततितमस्य गणतन्त्रदिवसस्य शुभाशयाः । अयं भारतवर्षस्य अमृतकालः। अमृतकाले समायोज्यमानेऽस्मिन् गणतन्त्रमहोत्सवे सर्वैरस्माभिः गणतन्त्रविषये चिन्तनं विधातव्यम् । वस्तुतः अद्य लिखितसंविधानस्य गणराज्यरूपेण परिपालनस्य पञ्चसप्ततिः वर्षाणि अतीतानि किन्तु वयं भारतीयाः परसहस्रवर्षेभ्यः अलिखितसंविधानस्य सदाचारान् परिपालयन्तः गणतान्त्रिकरीत्या एव व्यवहरन्तः स्म । केवलं लिखितसंविधानमात्रेण किञ्चन राष्ट्रं काचित् संस्था वा परमं वैभवं न प्राप्नोति । सदाचारपरम्परा अलिखितसंविधानरूपेण राष्ट्रं पोषयति । अतः राष्ट्रस्य संविधाने अथवा विश्वविद्यालयस्य अधिनियमादिषु यल्लिखितं तदेव करोमि यन्न लिखितं तन्न करोमीति न चन्तनीयम् । यथा गृहे तथा राष्ट्रे इति न्यायेन न केवलं अस्माकं देशः गणराज्यम् अपितु अस्माकं संस्था अस्माकं गृहमपि गणराज्यमेव । कुटुम्बे समाजे संस्थायां राष्ट्रे सर्वत्र गणस्य समूहनिर्णयस्य अनन्यसाधारणं महत्त्वं प्रवर्तते । कुटुम्बस्य समाजस्य राष्ट्रस्य वा विकासाय अलिखितसंविधानस्यापि सदाचाराः अवश्यं पालनीयाः भवन्ति । अस्मिन् दिवसे वयं भारतीयाः गणरूपेण स्वाराज्यम् आत्मने समर्पितवन्तः । वयं स्व-तन्त्रा इत्यत्र यद्यपि स्व इति पदेन स्वस्य आत्मन एव प्रतीतिः भवेत्तथापि यदा वयं गणरूपेण स्वात्मानम् अनुभवामः तदा एव अस्माकं बलं वर्द्धते । यथा स्वाधिकारः तथा गणाधिकारोऽपि परिचिन्तनीयः । संविधानेषु प्रायः जनाः अधिकारविषये चिन्तयन्ति किन्तु स्वकर्तव्यपरिपालनेन एव स्वाधिकाराः रक्ष्यन्ते इति अवश्यम् अवगन्तव्यम् । शिक्षा सैव या कर्तव्यं प्रबोधयति । कर्तव्यपरिपालनेन अधिकारसंरक्षणं स्वत एव सञ्जायते । विश्वविद्यालयस्य ये युवानः छात्राः सन्ति तैः ज्ञातव्यं यत् कर्तव्यपालनम् अकृत्वा वयं अधिकारान् प्राप्तुं कथमपि न शक्नुयाम । अतः अद्य अस्माभिः सर्वैः चिन्तनीयं यद्विश्वविद्यालयस्य छात्ररूपेण शिक्षकरूपेण कर्मयोगिरूपेण वा मया किं कर्तव्यमस्ति ।

### विकसितभारताय संस्कृतम्

नानाराज्येषु विविधभाषासु व्याप्तस्य अस्माकं राष्ट्रस्य एकतायाः सूत्रं संस्कृतम् एव । अस्माकं राष्ट्रस्य आधिभौतिकं आधिदैविकं सांस्कृतिकं च स्वरूपं संस्कृतेन एव परमोत्कर्षं प्राप्नुयात् । अतः विकसितभारतस्य लक्ष्यं साधयितुं साधकतमं करणं संस्कृतमेव। केन्द्रीयसंस्कृतविश्वविद्यालयः भारतस्य सर्वेषां संस्कृतविश्वविद्यालयानां प्रतिनिधिरूपेण महत्तरं दायित्त्वं बिभर्ति । अतः अद्यतन पावनदिवसे केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वैः सदस्यैः गणभावनया विकसितभारताय संस्कृतम् इति शिवसङ्कल्पः अवश्यं स्वीकरणीयः।

### युवनिधिः-

विकसितभारतस्य निर्माणाय प्रत्येकं जनेन स्वत्वं किमपि अवश्यं समर्पणीयम् । अस्माकं संस्कृतच्छात्राणां विकासे धनाभावस्य बाधा न भवतु इति धिया स्वामिविवेकानन्दजयन्त्यवसरे युवनिधिः इत्यभिख्यया कश्चिद् विनूतनः प्रकल्पः समारब्धः । अस्मिन् युवनिधि-संवर्धने सर्वेऽपि विश्वविद्यालयस्य शिक्षकाः पूर्वच्छात्राः कर्मयोगिनः संस्कृतानुरागिणश्च सहयोगं विधास्यन्तीति मे दृढो विश्वासः जागर्ति । यद्यपि एषः केन्द्रीयसंस्कृतविश्वविद्यालय गङ्गा इव समृद्धः प्रवहति तथापि यथा गङ्गाप्रवाहे स्थितो जनः गङ्गाप्रवाहादेव जलं स्वीकृत्य अर्घ्यं समर्पयति पुण्यं च अवाप्नोति तथैव विश्वविद्यालये वृत्तिं प्राप्तवद्भिः संस्कृतच्छात्राणां विकासाय स्वकीयम् अर्घ्यम् अवश्यं समर्पणीयम् इति प्रार्थये।

### संस्कृतच्छात्रेभ्यः विनूतनाः अध्ययनावसराः-

देशस्य प्रतिष्ठितासु IIT, IIM प्रभृतिसंस्थासु अस्माकं विश्वविद्यालयस्य संस्कृतच्छात्राणां अवसराः भवन्तु इति भावनया अस्माभिः कार्य क्रियमाणमस्ति । शीघ्रमेव अस्माकं विश्वविद्यालयस्य चिताः 24 छात्राः तत्र पठितुं अवसरं प्राप्स्यन्ति । एतदर्थं IIT, IIM प्रभृतिसंस्थाभिः सह सहमतिपत्रं संसिद्धं स्वीकृतम् अस्ति ।

आयुषमन्त्रालयस्य सहयोगेन नीटपरीक्षां विना अपि संस्कृतच्छात्राः आयुर्वेदस्य अध्ययनं कृत्वा वैद्यपदवीं प्राप्तु शक्ष्यन्ति । एतर्थमपि विश्वविद्यालयेन प्रयासः क्रियमाणः अस्ति ।

संस्कृतच्छात्राणां शिक्षणेतरक्षेत्रेषु अपि वृत्त्यवसराः भवन्तु । विविधक्षेत्रेषु संस्कृतच्छात्राणां कौशलवर्धनं विश्वविद्यालयस्य महत्त्वपूर्णं दायित्त्वं विद्यते । एतत्सर्वं मनसि निधाय सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयेन विधिविषये विनूतनः कार्यक्रमः L.L.B. समारब्धः । भारतीयपारम्परिकन्यायादिशास्त्रेषु कृतपरिश्रमाः छात्राः यदा आधुनिकं विधिशास्त्रमपि ज्ञास्यन्ति तदा तेषां प्रतिभया वादक्षेत्रे किञ्चन महत्परिवर्तनं सम्भविष्यति । विकसितभारते संस्कृतच्छात्राः उच्चतमन्यायालयेऽपि अभिभाषकरूपेण स्वकीयं वादमुपस्थापयेयुः इति लक्ष्यं स्वीकृत्य अस्माभिः विनूतनपाठ्यक्रमाः समारब्धाः सन्ति ।

# दीक्षान्तसमारोहः - चित्रगाथा









राष्ट्रगानं कुर्वन्तः मञ्चस्थाः अतिथयः




दीक्षान्तभाषणम्




तुलसीपूजनम्



संवादः

# दीक्षान्तसमारोहे सतां सद्भिः सङ्गः










मङ्गलाचरणं कुर्वत्यः चोटीपुरागुरुकुलस्य छात्राः

# ।। विद्वान् सर्वत्र पूज्यते ।।

केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रथम दीक्षान्तसमारोहे संस्कृतक्षेत्रे विशिष्टयोगदानं पुरस्कृत्य पञ्च प्रतिष्ठितः विद्वांसः प्रो. पी.के माधवन्, डॉ. लीना रस्तोगी, प्रो. गयाचरणत्रिपाठी, डॉ.देवीसहाय-पाण्डेयः, शतावधानी डॉ. आर.गणेशमहोदयश्च विद्यावाचस्पतिः इति मानदोपाधिना सम्मानिताः।

विश्वविद्यालयपक्षतः एतेषां सर्वेषां सादरम् अभिनन्दनम्।




सुरवाक्कवितापद्मालिनी लीना महस्विनी। विद्यावाचस्पतिख्याता ख्याता जीयाद्धरातले ।।




नृत्यति शारदा यस्य रसनारङ्गमन्दिरे। विद्यावाचस्पतिर्जीयाद् गणेशो ह्यवधानवान्।।




निगमागमकाव्यार्थतत्त्ववित्कोविदः कविः। देवीसहायपाण्डेयो विद्यावाचस्पतिर्जयेत् ॥




बहुभाषाभुजङ्गश्रीः बहुविद्याविटाधिपः। बहुकीर्तिलतालम्बः बहुदेशविचारणः ॥
श्रीगयाचरणप्राज्ञत्रिपाठ्युपाह्वसूरिणः। विद्यावाचस्पतिख्यातिरद्यसत्कारसत्कृता ॥




काव्यमधुरसास्रावैः माधवन् माधवोपमः । विद्यावाचस्पतिख्यातिं वाचस्पतिरसावगात् ।।




विदुषां समवायोऽत्र तिष्ठति ।

# प्रतिभायाः सम्माननम्

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।**







1945 शकसंवत्सरः, फाल्गुनकृष्णद्वादशी, गुरुवासरः
7 मार्च 2024, 1100 वादनम्


भारतीय स्टेट बैंक
State Bank Of India
Second Prize, National Winner, Online Sanskrit Olympiad
Seven Thousand Only
7000/-
Central Sankrit University, Delhi
आतिथेयः
कुलपतिः


केन्द्रीयसंस्कृतविश्वविद्यालयः
प्रथमः दीक्षान्तसमारोहः

# ॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥

संस्कृतजगति लब्धिप्रतिष्ठस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य अयं प्रथमः दीक्षान्तसमारोहः यशः वर्धताम् इति धिया **यशोभूमौ** मार्चमासस्य सप्तदिनाङ्के समायोजितः। अवसरेऽस्मिन् यशोभूमेः भव्यप्राङ्गणे केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिदर्शकः भारतस्य महामहिमराष्ट्रपतिः श्रीमती द्रौपदी-मुर्मु महोदया, कुलाधिपतिः श्रीधर्मेन्द्रप्रधानवर्यः, कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः, कुलसचिवः आचार्यः रा.गा.मुरलीकृष्णवर्यः, साक्षिभूतत्वेन विविधविश्वविद्यालयस्य कुलपतयः, प्राध्यापकाः, कर्मयोगिनः छात्राश्च उपस्थिताः आसन्।











# कुलपतियात्रा



यावच्चरामि खलु तत्र बुधाः प्रमाणम्




अयोध्याधाम्नि श्रीराममन्दिरप्राणप्रतिष्ठासमारोहे कुलपतिवर्यः, तेन सह अरुणगोविलः सुकविः कुमारविश्वाश्च।




श्रीरामदर्शनाय गच्छन् कुलपतिमहोदयः प्रकाशननिदेशकमहोदयश्च।



श्रीरघुनाथकीर्तिपरिसरे कुलपतिमहोदयस्य प्रवासः।










विश्वविद्यालयस्य विकासाय कुलाधिपतिना श्रीधर्मेन्द्रप्रधानवर्येण सह कुलपतिमहोदयस्य सौहार्दमेलनम् ।







एस.आई.टी वर्ल्ड पीस विश्वविद्यालयः, पुणे इत्यस्य उद्घाटनसत्रे भाषमाणः कुलपतिमहोदयः ।

# निदेशकगोष्ठी





केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालये कुलपतिमहोदयस्याध्यक्ष्ये निदेशकानां गोष्ठी सुसम्पन्ना।





नोएडानगरे प्रशासनिकगुणवत्तावर्धनार्थं सर्वपरिसरीयनिदेशकानाम् अधिकारिणाञ्च त्रिदिवसीया गोष्ठी ।




काष्ठमण्डपे (काठमाण्डू-नगरे) सम्पन्नम् अन्ताराष्ट्रियं नेपालभारतसंस्कृतसम्मेलनम् ।



# ॥ गुणमहतां महते गुणाय योगः ॥




केन्द्रीयसंस्कृतविश्वविद्यालयः,सोमनाथसंस्कृतविश्वविद्यालयश्च उभयोर्मध्ये शैक्षणिक संविद्ज्ञापकं (MoU) अभवत्।




केन्द्रीयसंस्कृतविश्वविद्यालयः, व उभयोर्मध्ये शैक्षणिक-संविद्ज्ञापकं (MoU) अभवत्।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे विधिशास्त्रपाठ्यक्रमस्य संविद्ज्ञापकपत्रे हस्ताङ्कनम् जातम्।

# ॥ विशिष्टोपलब्धयः ॥








अन्ताराष्ट्रीय-गीता-ओलम्पियाड् परीक्षां लिखन्तः गीतासमाराधकाः छात्राश्च ।





विश्वविद्यालयस्य छात्राः चन्द्रखानी ट्रैप हिमालये ध्वजोत्तोलनं कृत्वा विश्वविद्यालयस्य कीर्तिं वर्धितवन्तः ।

# कुलपतिपुरस्काराः

## शिक्षाविभूषणपुरस्कारः


प्रो.राघवेन्द्रभट्टः


प्रो.देवदत्त सरोदे


प्रो.वाई.एस् रमेशः

## शिक्षाभूषणपुरस्कारः


प्रो.चन्द्रशेखरभट्टः


प्रो.भरतभूषण त्रिपाठी


डॉ. गणेश्वरनाथ झा


डॉ.कार्तिक-भागवतः

## शिक्षाश्रीपुरस्कारः


डॉ.मञ्जुठेमदेवः


डॉ.अनूपकुमारपाण्डेयः


प्रो.रत्नमोहन झा


डॉ.धर्मेन्द्रसिंहदेवः


प्रो.श्यामदेवमिश्रः


डॉ.प्रफुल्लगडपालः

## शिक्षाश्रीपुरस्कारः



डॉ.वि.सुब्रह्मण्यम्



प्रो.गजाला अंसारी



डॉ.राजकुमारमिश्रः

## शिक्षान्यासीपुरस्कारः



डॉ. राउतमाला आनन्दः

## कर्मयोगविभूषणपुरस्कारः



श्री रोहतास सिंहः

## कर्मयोगभूषणपुरस्कारः



श्रीमती गङ्गा शर्मा



श्री प्रमोदकुमारपंवारः



श्री अनिलकुमारनौटियालः

## कर्मयोगश्रीपुरस्कारः



श्री नवीनकुमारः



श्री किशनकुमारः



श्री विनोदथापा

## ॥ छात्रोपलब्धयः ॥



मुख्यालयेन आयोजितायां राष्ट्रस्तरीयस्पर्धायां श्रृङ्गेरीपरिसरस्थ शिक्षाशास्त्रिच्छात्रः श्री सुदर्शन एम्,एस् प्रथमपुरस्कारं प्राप्नोत्।



मुख्यालयस्य शोधच्छात्रा सुश्री शिप्रा श्रीवास्तवः संयुक्त एकलव्य-आदर्श-आवासीयविद्यालये नियोजनं प्राप्तवती।



मुख्यालयस्य शोधच्छात्रः श्री मुकुल शर्मा संयुक्त एकलव्य-आदर्श-आवासीयविद्यालये नियोजनं प्राप्तवान्।



मुख्यालयस्य शोधच्छात्रः श्री गौतम मिश्रः BPSC इति संस्थया माध्यमिक विद्यालये नियोजनं प्राप्तवान्।



मुख्यालयस्य शोधच्छात्रा सुश्री अकाङ्क्षा श्री BPSC इति संस्थया माध्यमिक विद्यालये नियोजनं प्राप्तवती।



मुख्यालयस्य शोधच्छात्रः श्री मनोजमिश्रः विश्वविद्यालयस्य मुख्यालये शिक्षाशास्त्रविभागे तकनीकिसहायकपदे नियोजनं प्राप्तवान्।



श्रृङ्गेरीपरिसरस्य शोधच्छात्रा सुश्री अर्चना जेना संयुक्त एकलव्य-आदर्श-आवासीयविद्यालये नियोजनं प्राप्तवती।

## ॥ आचार्योपलब्धयः ॥



वेदाङ्गवेदभाष्यविद्याशाखायाः सहायकाचार्यः डा. दुर्गाशरणरथमहोदयः उत्तरप्रदेशसंस्कृतसंस्थानस्य पञ्चाशत्सहस्ररूप्यकात्मकस्य वेदपण्डितपुरस्कारेण पुरस्कृतः।

# परिसरोपलब्धयः



केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल-गुरुवायूर्-जयपुरम् परिसरत्रये राष्ट्रियशिक्षानीति 2020 इत्यनुसारं ITEP -पाठ्यक्रमः प्रारब्धः।




भारतस्य प्रधानमन्त्रिणा आभासीयमाध्यमेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथपरिसरस्य उद्घाटनं कृतम्।






जयपुरपरिसरे विधिशास्त्रपाठ्यक्रमस्य शुभारम्भः।





विश्वविद्यालयस्य मुख्यालये स्वतन्त्रतादिवसाचरणं कुलपतिप्रमुखैः सह अभवत्। कार्यक्रमेऽस्मिन् सर्वेऽपि राष्ट्रभक्ताः समुपस्थिताः आसन्।





नूतन-आपराधिक-अधिनियमत्रयमभिलक्ष्य व्याख्यानकार्यक्रमे प्रो. पुष्पकुमारलक्ष्मणवर्यः।





शरीरमाद्यं खलु धर्म साधनम् इति सूक्त्यनुसारं मुख्यालये कर्मयोगिनां स्वाथ्यपरीक्षणम्।





द्रुतगत्या प्रकाशनकार्यसम्पादनार्थम् गोष्ठी आयोजिता।





पर्यावरणदिवसमुपलक्ष्य माननीयकुलपतिमहोदयेन वृक्षारोपणं कृतम् । कुलसचिवमहोदयः अन्ये च सदस्याः समुपस्थिताः आसन्।





अन्ताराष्ट्रिय-गीता ओलम्पियाड् परीक्षायाः परिणामोद्घोषणां कुर्वन् कुलपतिमदोदयः।





मुख्यालये 'परीक्षा पे चर्चा' इति कार्यक्रमे समुपस्थिताः आभासीयमाध्यमेन विविधपरिसरीयाः छात्राः,अध्यापकाश्च।





अन्ताराष्ट्रिय स्थूलान्न-दिवसः मुख्यालये समाचरितः। कुलपतिमहोदयः,कर्मयोगिनः सोत्साहं भागं गृहीतवन्तः।






केन्द्रीयसंस्कृतविश्वविद्यालयः, अरविन्दो फाउन्डेशन, सिङ्गापुरमैनेजमेन्टविश्वविद्यालयः एतैः त्रिभिः संयुक्ततत्त्वाधाने सिङ्गापुरनगरे समायोजितायां सङ्गोष्ठ्यां कुलसचिवमहोदयः अध्यापकाश्च ।










अन्ताराष्ट्रीययोगदिवसे छात्रान् प्रबोधयन् कुलपतिमहोदयः। योगासनं प्रदर्शयन्तः छात्राः शिशु-योगसाधिका च।






NAAC
अभियान
3-24




केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
NAAC






केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
61तमी अखिलभारतीयशास्त्रीयस्पर्धा
2023-24







केन्द्रीयसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्रः श्रीराममन्दिरस्य अर्चकः श्री शिवममहोदयः कुलपति सम्मानितः। श्लोकवाचनाय पुरस्कृता बाला।






मञ्चे कार्यकर्तृगणः।

# श्रृङ्गेरीपरिसरवार्ताः






कर्णाटकराज्यस्थ श्रृंगेरी परिसरे द्वात्रिंशो वार्षिकोत्सवस्य आयोजनमभवत्।



अखिलभारतीयरूपकमहोत्सवे कृपणखल्वाटचरितमिति रूपकमभिनीय श्रीराजीवगान्धीपरिसरच्छात्रैः द्वितीयपुरस्कारः अवाप्तः।




राष्ट्रियसेवायोजनाकेन्द्रेण परिसरे आयोजितं रक्तदानशिबिरम्।



तिरुपतौ प्रातिभसमारोहे विविधपुरस्करैः सम्मानितः श्रृङ्गेरीच्छात्रगणः मार्गदर्शकाभ्यां सह।




परिसरे वाक्यार्थपरिषदः चतुर्थम् अधिवेशनम् जातम्।






महाभाष्यस्य कारकाह्निकस्याध्ययनम्” इति विषयिण्याः व्याकरणविद्याशाखीयायाः कार्यशालायाः चित्रम्।



कार्यशालायां प्रशिक्षणार्थिनः उद्बोधयन् कुलपतिः आचार्यः श्रीनिवासः वरखेडी।



कार्यशालायां भागग्राही मुक्तस्वाध्यायपीठसदस्यसमूहः।



परिसरस्य प्रतिभावन्तः छात्राः जगद्गुरोः आशीर्वचोभिः कृतार्थाः।




अभिभावकाध्यापकसंघस्य समावेशः।









परिसरच्छात्राः विविधशैक्षिकस्पर्धासु पुरस्कारान् प्राप्य परिसरस्य गौरवम् अवर्धयन्।

# गुरुवायूर्-परिसरवार्ताः



न्यायविद्याशाखया समायोज्यमाना सप्ताहव्यापिनी राष्ट्रियकार्यशाला प्राचलत्।




राष्ट्रियसेवायोजनया परिसरस्य शोधनं कृतम्। कार्यक्रमेऽस्मिन् परिसरनिदेशकाः,अध्यापकाः,छात्राश्च उपस्थिताः आसन्।




पावरट्टीकेन्द्रस्य पि.टि.कुरियक्कोस् स्मृतिभवने केरळ-कलारूपाणां राष्ट्रियकार्यशाला आयोजिता।



तिरुपतिस्थे राष्ट्रियसंस्कृतविश्वविद्यालये आयोजिते आभारतसंस्कृतछात्राणां प्रातिभसमारोहे गुरुवायूर्-परिसरस्थाः छात्राः मार्गदर्शकाश्च।



Mathrubhumi മാതൃഭൂമി

സംസ്കൃത സർവകലാശാലാ സെമിനാർ സമാപിച്ചു



केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो श्रीनिवासवरखेडीवर्यः गुरुवायूरपरिसरस्य पावरट्टि केन्द्रे केरलीयकलाकेन्द्रस्य शिक्षकसंकायविकासकेन्द्रस्य च उद्घाटनमकरोत्।






प्रो.के.के.षैन् महोदयः २०२५ मई-मासस्य १७ दिनाङ्के गुरुवायूरपरिसरस्य निदेशकरूपेण, कार्यभारं स्वीकृतवन्तः।





साहित्यविभागस्य अध्यक्षाः प्रो.ई.एम.राजन् महोदयस्य सेवानिवृत्तिवेलायां परिसरे कुलपतिभिः वरिष्ठाचार्यैश्च तेषां समादरणं कृतम्।

# भोपालपरिसरवार्ताः




विश्वविद्यालयानुदानायोगभारतीयज्ञानप्रणाल्योस्संयुक्ततत्त्वाऽवधाने भारतीयज्ञानपरम्परास्रोतः शिक्षणप्रशिक्षणकार्यक्रमः आयोजितः।




संस्कृतविद्यायाः उन्नायकानां कुलपतिचराणाम् आचार्यराधावल्लभत्रिपाठिवर्याणां पञ्चसप्ततितमः जन्मदिवसः अमृतमहोत्सवरूपेण अनुष्ठितः।






राष्ट्रियशिक्षानीतौ (२०२०) शोधसम्भावनाः इति विषयमधिकृत्य द्विदिवसीयायाः राष्ट्रीयसंगोष्ठ्याः आयोजनमभवत्।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे वार्षिकोत्सवः सम्मानकार्यक्रमश्च ।






शिक्षाशास्त्रविद्याशाखाद्वारा राष्ट्रियसेवायोजनायाः सप्तदिवसात्मकशिविरस्य आयोजनम् इमलियाग्रामे अभवत् ।

# श्रीसदाशिवपरिसरवार्ता:







श्री सदाशिवपरिसरे त्रिदिवसीया ADHYAYAN कार्यशालायाः आयोजनमभवत् ।







विकसितभारतसंकल्पयात्रायाः समारम्भः जातः ।





फेब्रुवरीमासे अष्टादशीराष्ट्रीयरङ्गमञ्चकार्यक्रमः आयोजितः ।





‘युवा आवाजें राष्ट्र के लिए भागीदारी और सशक्तीकरण’ इति विषयमुरीकृत्य परिसरे राष्ट्रीययुवसंसदः आयोजनं कृतम् ।




श्रीसदाशिवपरिसरस्य शिक्षाशास्त्रविद्याशाखायाः शैक्षिकक्रीडोत्सवः-2024 समायोजितः ।




परिसरे जगद्गुरुशङ्कराचार्यव्याख्यानमालायाः आयोजनं कृतम् ।




अन्ताराष्ट्रिययोगदिवसः समाचरितः ।

# वेदव्यासपरिसरवार्ताः



लोकहिताय बौद्धमतस्य दुर्लभान् पाण्डुलिपिग्रन्थान् समर्पयन्तः बौद्धभिक्षुकाः।



विद्याभारतीसंस्थया सह नियोजनसम्बन्धी हस्ताङ्कनम् (MoU) जातम्। अवसरेऽस्मिन् माननीय निदेशकाः समस्ताधिकारिणः च उपस्थिताः आसन्।




राष्ट्रीयसेवायोजनान्तर्गतं रक्तदानशिविरस्य आयोजनं कृतम्।




परीक्षायाः प्रतीक्षायाम् इति कार्यक्रमे आभासीयमाध्यमेन सम्पृक्ताः छात्राः अध्यापकाश्च।



सरलमानकसंस्कृतमुद्दिश्य एकदिवसीया गोष्ठी पी.एम.श्री विद्यालये आयोजिता।







हिमालयप्रदेशेषु स्वच्छतादिवसाचरणम् आचरितम्।

# एकलव्यपरिसरवार्ताः






केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे ब्रेलदिवसमुपलक्ष्य ०४.०१.२०२४ दिनाङ्के कार्यक्रमः






स्वामिविवेकानन्दस्य जन्मदिवसमुपलक्ष्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे राष्ट्रिययुवदिवसाचरणं कृतम्।






पराक्रमदिवससन्दर्भे श्रीमतः सुभाषचन्द्रबोसवर्यस्य स्मरणार्थं कार्यक्रमः आयोजितः।





केन्द्रीयसंस्कृतविश्वविद्यालयपक्षतः छात्राणां विद्यास्तरवर्धनाय प्रोत्साहनाय च राज्यस्तरे शास्त्रीयस्पर्धानाम् आयोजनम्।




एकलव्यपरिसरे 14-02-2024 दिनाङ्के परिसरीयच्छात्रैः सरस्वतीपूजा आयोजिता। निदेशकसहिताः समस्तसदस्याः उपस्थिताः




भारतसर्वकारस्य माननीयैः प्रधानमन्त्रिभिः श्री नरेन्द्रमोदीवर्यैः केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य शैक्षिकभवनादीनामुद्घाटनं कृतम्।




परिसरे वार्षिकोत्सवकार्यक्रमः समाचरितः। मुख्यातिथियः श्री दर्शनलालगोलवर्यः (IG,CRPF) छात्राणां पुरस्कारप्रदानेनउत्साह वर्धनं कृतवन्तः। परिसरनिदेशकाः प्रो. प्रभातकुमारमहापात्रवर्याणाम् आध्यक्ष्ये कार्यक्रमः सुसम्पन्नः।

# गङ्गानाथझापरिसरवार्ताः





गङ्गानाथझापरिसरे महर्षिभरद्वाजपुष्पार्चनकार्यक्रमः सुसम्पन्नः। अवसरेऽस्मिन् निदेशकसहिताः परिसरसदस्याः समुपस्थिताः आसन्।






अवधानकार्यशालायां उद्बोधयन् डॉ.उमामहेश्वरवर्यः।






प्राक्शोधकार्यक्रमान्ततर्गत शोधच्छात्राणां (२०२२-२३) सौप्रस्थानिककार्यक्रमः समायेजितः।





पाण्डुलिपिविज्ञानं पुरालिपिविज्ञानञ्च इति राष्ट्रीयकार्यशालायाः आयोजनमभवत्। तत्र विविधसंस्थातः शोधच्छात्राः अध्यापकाश्च






वसन्तपञ्चम्याः सुभावसरे सरस्वतीदेव्याः समाराधनं कुर्वन्तः माननीयः निदेशकः,अध्यापकाः, शोधच्छात्राश्च।





राष्ट्रियशिक्षानीतिसन्दर्भे संस्कृतस्य अवकाशाः संस्कृतज्ञानाम् उत्तरदायित्वञ्च इति विषये विशिष्टव्याख्यानमायोजितम्।


विवेचनी



पाणिनीय-धातुवृत्ति-कोषः



पालि-प्राकृत-अनुशीलनम्
Pāli-Prākṛta-Anuśīlanam
केन्द्रीय संस्कृत विश्वविद्यालय



गीतामृतम्



हेत्वाभाससामान्यनिरुक्तिप्रकरणम्


# अभिनव प्रकाशनानि



रसप्रकर्षः
( संस्कृतनाट्यसङ्ग्रहः )
प्रो. श्रीनिवास: वरखेडी
केन्द्रीयसंस्कृतविश्वविद्यालयः


हस्तलेखशास्त्रम्
सोपज्ञहिन्दीआङ्ग्लानुवादसमेतम्
प्रो. श्रीनिवास: वरखेडी
केन्द्रीयसंस्कृतविश्वविद्यालयः



नारायणीयम्


गुरुतत्त्वदीपिका
प्रो. श्रीनिवास: वरखेडी
केन्द्रीयसंस्कृतविश्वविद्यालयः


श्रीमद्भगवद्गीता
पैशाच-शाङ्कर-भाष्यसमन्विता


कुवलयकौमुदी
कुवलयानन्दसारसङ्ग्रहः
केन्द्रीयसंस्कृतविश्वविद्यालयः


सङ्गीतचन्द्रः
Saṅgītacandraḥ


ध्वन्यालोकदर्शनम्
प्रो. श्रीनिवास: वरखेडी
प्रो. एन्. लक्ष्मीनारायणभट्टः
केन्द्रीयसंस्कृतविश्वविद्यालयः



श्रीअरविन्द-चरितम्






विश्वविद्यालयस्य मुक्तस्वाध्यायपीठे प्रचाल्यमाणाः अभिनव पाठ्यक्रमाः ।



केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
विश्वपृथ्वीदिवसः
असंबाधं बध्यतो मानवानां यस्यां उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥
आचार्यः श्रीनिवासः वरखेडी, कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
2081
22-04-2024



केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
जानकीजयन्त्याः शुभाभिनन्दनानि
डा. धीरजकुमारमिश्रः
16-05-2025
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993



केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
जगद्गुरुश्रीशङ्कराचार्यजयन्त्याः शुभाभिनन्दनानि ।
शंकरं शंकराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
आचार्यः श्रीनिवासः वरखेडी, कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
12-05-2024



केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
जगद्गुरुस्वामिरामानुजाचार्यजयन्त्याः शुभाशयाः
पाषण्डषण्डगिरिखण्डनवज्रदण्डाः प्रच्छन्नबौद्धमकरालयमन्थदण्डाः ।
वेदान्तसारसुखदर्शनदीपदण्डा रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः ॥
13-05-2024
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993



केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
मातृदिवसः
नास्ति मातृसमा छाया नास्ति मातृसमा गतिः ।
नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रपा ॥


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
अन्ताराष्ट्रिय-खगोलविज्ञानदिवसः
आचार्यः श्रीनिवासः वरखेडी, कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
29-04-2024
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
बुद्धपूर्णिमायाः शुभाभिनन्दनानि
23-05-2024


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
भगवतः परशुरामजयन्त्याः शुभकामनाः
अग्रतः चतुरो वेदाः पृष्ठतः सशरं धनुः ।
इदं ब्राह्मं इदं क्षात्रं शापादपि शरादपि ॥
आचार्यः श्रीनिवासः वरखेडी, कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
10-05-2024
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
अन्ताराष्ट्रिय-नृत्यदिवसः
आचार्यः श्रीनिवासः वरखेडी, कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
29-04-2024


WISDOM FROM CLASSICAL LITERATURE
यन्नातुरबलं हन्ति व्याधिवीर्यं निहन्ति च ।
तदेवास्यावचार्यं स्यादाव्याध्युच्छेददर्शनात् ॥
Medicine that helps in curing the disease and doesn't destroy the strength of the patient should be used for treatment until complete eradication of the disease.
Scan for More


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
अन्ताराष्ट्रियपरिवारदिवसः
नित्यं प्रसूय मधु वर्धयतीह प्रीतिं पुष्टिं प्रदाय परिपुष्यति वंशपुष्पम् ।
प्रेम्णा प्रसादनपरा परिवारवल्ली किं किन्न साधयति नः परितो हि पुंसाम् ॥
डा. धीरजकुमारमिश्रः
15-05-2025
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993


केन्द्रीयसंस्कृतविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
अन्ताराष्ट्रियदूरसञ्चारदिवसः
17-05-2025
@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993